|| শ্ৰীদশাৱতাৰস্তোত্ৰম ||

নমোঽস্তু নাৰায়ণমংদিৰায় নমোঽস্তু হাৰায়ণকংধৰায় |
নমোঽস্তু পাৰায়ণচৰ্চিতায় নমোঽস্তু নাৰায়ণ তেঽৰ্চিতায় || ১ ||

নমোঽস্তু মৎস্যায় লয়াব্ধিগায় নমোঽস্তু কূৰ্মায় পয়োব্ধিগায় |
নমো ৱৰাহায় ধৰাধৰায় নমো নৃসিংহায় পৰাৎপআয় || ২ ||

নমোঽস্তু শক্ৰাশ্ৰয়ৱামনায় নমোঽস্তু ৱিপ্ৰোৎসৱভাৰ্গৱায় |
নমোঽস্তু সীতাহিতৰাঘৱায় নমোঽস্তু পাৰ্থস্তুতয়াদৱায় || ৩ ||

নমোঽস্তু বুদ্ধায় ৱিমোহকায় নমোঽস্তু তে কল্কিপদোদিতায় |
নমোঽস্তু পূৰ্ণামিতসদ্গুণায় নমোঽস্তু নাথায় হয়াননায় || ৪ ||

কৰস্থশংখোল্লসদক্ষমালাপ্ৰবোধমুদ্ৰাভয়পুস্তকায় |
নমোঽস্তু ৱক্ত্ৰোদ্গিৰদাগমায় নিৰস্তহেয়ায় হয়াননায় || ৫ ||

ৰমাসমাকাৰচতুষ্টয়েন ক্ৰমাচ্চতুৰ্দিক্ষু নিষেৱিতায় |
নমোঽস্তু পাশ্ৱৰ্দ্ৱয়গদ্ৱিৰূপশ্ৰিয়াঽভিষিক্তায় হয়াননায় || ৬ ||

কিৰীটপট্টাংগদহাৰকাংচীসুৰত্নপীতাংবৰনূপুৰাদ্যৈঃ |
ৱিৰাজিতাংগায় নমোঽস্তু তুভ্যং সুৰৈঃ পৰীতায় হয়াননায় || ৭ ||

ৱিদোষকোটীংদুনিভপ্ৰভায ৱিশেষতো মধ্ৱমুনিপ্ৰিয়ায় |

ৱিমুক্তৱংদ্যায় নমোঽস্তু ৱিষ্ৱগ্ৱিধৃতৱিঘ্নায় হয়াননায় || ৮ ||

নমোঽস্তু শিষ্টেষ্টদৱাদিৰাজকৃ তাষ্টকাভিষ্টুতচেষ্টিতায় |
দশাৱতাৰৈস্ত্রিদশার্থদায় নিশেশবিংবস্থহয়াননায় || ৯ ||

|| ইতি শ্রীৱাদিৰাজতীর্থশ্রীচৰণৱিৰচিতং দশাৱতাৰস্তোত্রম ||